न्यय: । मिताक्षरायान्तु धर्म्मपूजन एव स्कन्द-
नियम: । तथा,—
'चतुर्द्दिक्षु ततो होम: कर्त्तव्यो वेदपारगै: ।
आज्येन हविषा चैव समिद्भिर्होमसाधनै: ॥
सावित्र्या प्रणवेनैव स्वाहान्तेनैव होमयेत् ॥'
सावित्र्या गायत्र्या । तेन प्रणवादिकां गायित्री-
मुच्चार्य्य पुन: स्वाहाकारान्तं प्रणवमुच्चार्य्य
समिदाज्यचरून् प्रत्येकमष्टोत्तरशतं जुहुयादिति
मिताक्षरा । वस्तुतस्तु गायत्रीहोमे योगियाज्ञ-
वल्क्य: ।
'प्रणवव्याहृतिभ्याञ्च स्वाहान्ते होमकर्म्मणि ।
तेन प्रणवादिकां सव्याहृतिकां गायत्रीमुच्चार्य्य
स्वाहाकारान्तं पुन: प्रणवमुच्चार्य्य आज्य-
पायससमिधो मिलित्वा अष्टोत्तरशतं जुहुयात्
लाघवात् । अतएव दैवतैक्ये हि दधिपयसो-
स्तन्त्रेणानुष्ठानम् । ऐन्द्रं दध्यमावास्यायामैन्द्रं
पयोऽमावास्यायामिति श्राद्धविवेक: ॥ * ॥
यत्तु पञ्चलाङ्गलमहादाने ।
'पर्ज्जन्यादित्यरुद्रेभ्य: पायसं निर्व्वपेच्चरुम् ।
एकस्मिन्नेव कुण्डे च गुरुर्यस्मै निवेदयेत् ॥
पलाशसमिधस्तद्वदाज्यं कृष्णतिलांस्तथा ॥'
इति मत्स्यपुराणात् ॥
चतुर्णां होतृणां मध्ये यस्मै गुरु: पर्ज्जन्यादिभ्यो
होमं कुर्व्विति आज्ञां करोति स एव पर्ज्जन्याय
आदित्याय रुद्रेभ्यस्तत्तन्मन्त्रै: पायसं पलाश-
समिदाज्यकृष्णतिलांश्च प्रत्येकं जुहुयादिति
भूपालप्रभृतिभिरुक्तम् । तद्युक्तं तद्वदिति
तथेत्याभ्यां प्रत्येकद्रव्येण होमविधानात् । अत-
एव रत्नाकरकृद्भिश्चरुं जुहुयादित्युक्त्वा तद्वदिति
पलाशादि जुहुयादित्युक्तम् । अतएव वृषोत्-
सर्गे वाचस्पतिमिश्रप्रभृतिभिरग्न्यादिहोमशेष-
पायसपूषहोमशेषपिष्टकाभ्यां मिलिताभ्यां सकृत्
स्विष्टिकृद्धोमो विहित: । अशक्तौ तु ।
'होमो ग्रहादिपूजायां शतमष्टाधिकं भवेत् ।
अष्टाविंशतिरष्टौ वा शक्त्यपेक्षमथापि वा ॥'
इति देवीपुराणीयादिपददर्शनात् अत्राप्यन्या
सङ्ख्या उन्नेया । एवं मत्स्यपुराणे ।
'शृणु राजन् महाबाहो तड़ागादिषु यो विधि: ।
वेद्यास्तु परितो गर्त्तारत्निमात्राम्त्रिमेखला: ॥
नव सप्ताथवा पञ्च योनिवक्त्रा नृपात्मज ।
इति नवादिकुण्डान्युक्त्वा,—
'स्वल्पेऽप्येकाग्निमत्कार्य्यो वित्तशाठ्याद्दृते नृभि:॥'
इति दर्शनादत्रापि अशक्तावेकाग्निविधिरिति
वदन्ति । अत्र प्राड्विवाकस्त्वेव होम: ।
'दिव्येषु सर्व्वकार्य्याणि प्राड्विवाक: समाचरेत् ।
अध्वरेषु यथाध्वर्य्यु: सोपवासो नृपाज्ञया ॥'
इति मिताक्षराधृतपितामहवचनात् । अध्वर्य्यु-
र्यजमानमात्रम् । न चात्र भिन्नशाखिनाम्ने-
त्विणां रथकारवद्विद्याप्रयुक्तिकल्पमेति वाच्यम् ।
ब्राह्मणमात्रस्य नानाशाखापाठावधानेन कल्प-
नानुपपत्ते: । तथा च मनु: ।
'वेदानधीत्य वेदौ वा वेदं वापि यथाक्रमम् ।
अविप्लुतब्रह्मचर्य्यो गृहस्थाश्रममाचरेत् ॥' इति ।
प्रायश्चित्तहोमस्तु सामगानां महाव्याहृतिभि: ।
'यत्र व्याहृतिभिर्होम: प्रायश्चित्तात्मको भवेत् ।
चतस्रस्तत्र कर्त्तव्या: स्त्रीपाणिग्रहणे यथा ॥
अपि वाज्ञातमित्येषा प्राजापत्यापि वाहुति: ।
होतव्या त्रिविकल्पोऽयं प्रायश्चित्तविधि: स्मृत: ॥'
इति छन्दोगपरिशिष्टात् ॥
न तु शाट्यायनहोमो भवदेवभट्टोक्त: । त्रिवि-
कल्प इत्यनेन तस्य निरासात् । भट्टनारायणा-
दिभिरप्रमाणीकृतत्वाच्च ॥ * ॥ पितामह: ।
'तोलयित्वा नरं पूर्व्वं तस्मात्तमवतार्य्य च ।
प्राङ्मुख: प्राञ्जलिर्भूत्वा प्राड्विवाकस्ततो वदेत् ॥
एह्येहि भगवन् धर्म्म ! दिव्ये ह्यस्मिन् समाविश ।
सहितो लोकपालैस्त्वं वस्वादित्यमरुद्गणै: ॥
तच्चार्थमभियुक्तस्य लेखयित्वा तु पत्रके ।
मन्त्रेणानेन सहितं कुर्य्यात्तस्य शिरोगतम् ॥
आदित्यचन्द्रावनिलोऽनलश्च
द्यौर्भूमिरापो हृदयं यमश्च ।
अहश्च रात्रिश्च उभे च सन्ध्ये
धर्म्मोऽपि जानाति नरस्य वृत्तम् ॥
इमं मन्त्रविधिं कृत्स्नं सर्व्वदिव्येषु योजयेत् ।
आवाहनञ्च देवानां तथैव परिकल्पयेत् ॥ * ॥
घटमामन्त्रयेच्चैवं विधिनानेन मन्त्रवित् ।
त्वं घटो ब्रह्मणा सृष्ट: परीक्षार्थं दुरात्मनाम् ॥
धकाराद्धर्म्ममुद्दिष्टं टकारात् कुटिलं नरम् ।
धृतो धारयसे यस्माद्घटस्तेनाभिधीयते ॥
त्वं वेत्सि सर्व्वभूतानां पापानि सुकृतानि च ।
त्वमेव देव ! जानीषे न विदुर्यानि मानवा: ॥
व्यवहाराभिशस्तोऽयं मानुष: शुद्धिमिच्छति ।
तदेनं संशयादस्माद्धर्म्मतस्त्रातुमर्हसि ॥'* ॥
लेखनप्रकारमाह नन्दिपुराणम् ।
'शुभे नक्षत्रदिवसे शुभे राशिदिनग्रहे ।
लेखयेत् पूज्यदेवेशान् रुद्रब्रह्मजनार्द्दनान् ॥
पूर्व्वदिग्वदनो भूत्वा लिपिज्ञो लेखकोत्तम: ।
निरोधो हस्तवाक्योश्च मसीपत्रविधारणे ॥
मत्स्यपुराणञ्च ॥
'शीर्षोपेतान् सुसम्पन्नान् समश्रेणिगतान् समान् ।
अक्षरान् लेखयेद्यस्तु स नरो लेखक: स्मृत: ॥'
इति दानसागर: ॥
धारयसे इत्यत्र भावयसे इति पाठोऽनुपयुक्त: ।
तथा हि । कुटिलं पापिनं संशयोपपन्नं वा ।
आद्ये पापिनमित्येतावन्मात्राभिधानमनुपपन्नं
शुद्धगत्या शुद्धस्यापि ज्ञापनात् द्वितीये पूर्व्व-
सिद्धत्वेन ज्ञापनानुपपत्ति: । तस्मात् कुटिलं
व्यवहाराभिशस्तं धारयसे इत्येवार्थ: । अतएव
उपसंहारे संशयादस्मादित्युक्तम् । अतएव
कालिकापुराणेऽपि । मानुषस्तोल्यते त्वयीत्युक्त-
मिति ॥ * ॥ स्मृतिसमुच्चयव्यवहारदीपिकयो-
र्विष्णु: । घटञ्च समयेन गृह्णीयात् तुलाधारकञ्च ।
'धर्म्मपर्य्यायवचनं घट इत्यभिधीयते ।
त्वमेव घट जानीषे न विदुर्यानि मानवा: ॥
व्यवहाराभिशस्तोऽयं मानुष: शुद्धिमिच्छति ।
तदेनं संशयादस्माद्धर्म्मतस्त्रातुमर्हसि ॥
ब्रह्मघ्ना ये स्मृता लोका ये लोका: कूटसाक्षिण: ।
तुलाधारस्य ते लोकास्तुलां धारयतो मृषा ॥'
समयेन त्वमेव घट इत्यादिनियमेन । घटं गृह्णी-
यात् योजयेत् । तुलाधारकञ्च ब्रह्मघ्ना ये इत्या-
दिना नियमेनेत्यर्थ: । अत्र नानामुनिप्रणीत-
मन्त्राणाम् एकतरपाठानां समानप्रयोजनानां
यवव्रीहिवद्विकल्प इति ग्रन्थगौरवात्ते न
लिखिता: । अभिशस्तप्राड्विवाकपाठानान्तु
दृष्टार्थानां समुच्चय: । पितामह: ।
'नित्यं देयानि दिव्यानि शुचये चार्द्रवाससे ।'
शुचये जननमरणाशौचरहिताय । व्रतिनं
प्रति याज्ञवल्क्यदीपकलिकायां नारद: ।
'हस्तच्छतेषु सर्व्वेषु कुर्य्यात् हंसपदानि च ।
तान्येव पुनरालक्षेद्धस्तौ बिन्दुविचिन्तितौ ॥'
इत्यग्निविधौ हस्तव्रतिनो हस्तव्रतमलक्तादिना
चिह्नितं कृत्वा व्रतान्तरं जातं न वा इति
ज्ञातव्यमिति सुतरां व्रतिनो दिव्याधिकार: ।
नारद: ।
'अहोरात्रोषिते स्नाते आर्द्रवाससि मानवे ।
पूर्व्वाह्णे सर्व्वदिव्यानां प्रदानमनुकीर्त्तितम् ॥'* ॥
घटानुमन्त्रणात् प्रागपि पुनस्तोलनमाह
कालिकापुराणम् ।
'उपोषितं तथा स्नातं म्लतुषम् प्रथमं तुलाम् ।
सन्तोल्य कारयेद्रेखामवतार्य्यानुमन्त्रयेत् ॥'
याज्ञवल्क्य: ।
'तुलाधारणविद्वद्भिरभियुक्तस्तुलाश्रित: ।
प्रतिमानसमीभूतो रेखां कृत्वावतारित: ॥
त्वं तुले सत्यधामासि पुरा देवैर्विनिर्म्मिता ।
तत् सत्यं वद कल्याणि ! संशयान्मां विमोचय ॥
यद्यस्मि पापकृन्मातस्ततो मां त्वमधो नय ।
शुद्धश्चेत् गमयोर्द्ध्वं मां तुलामित्यभिमन्त्रयेत् ॥'
तुलाधारणाभिज्ञैर्व्वणिगादिभि: पाषाणादि-
प्रतिमानसमीकृतस्तुलाधिरूढ़: अभिशस्तो
दिव्याधिकारी । येन सन्निवेशेन प्रतिमानसमी-
करणदशायां यत्र पादादयो व्यवस्थिता: शिक्य-
रज्ज्वश्च तत्र पाण्डुलेखेनाङ्कयित्वा पिटकादव-
तारित: त्वन्तुलेति मन्त्रेण तुलां प्रार्थयेत् । सत्यं
सन्दिग्धार्थस्य स्वरूपं वद दर्शय । पापकृत्
सत्यवादी शुद्धश्च सत्यवादी । मन्त्रश्चायं स्मार्त्त:
पौराणिकत्वात् शूद्रैरपि पाठ्य: । वेदमन्त्रवर्ज्जं
शूद्रस्येति छन्दोगाह्निकधृतस्मृतौ वेदेति विशे-
षणात् श्राद्धविश्वदेवादौ तु विशेषतो नमस्कार-
मन्त्रविधानात् स्मार्त्तमन्त्रोऽपि निषिद्ध: । प्रप-
ञ्चस्तु तिथितत्त्वेऽनुसन्धेय: । स्त्रीपरीक्षायामपि
अविकृत एव प्रयोज्य: । दिव्यानीह विशुद्धये
इत्यनेन सन्दिग्धार्थसन्देहनिवृत्तिफलकतयाविशे-
षेण स्त्रीपुंकर्तृकदिव्यविधानेन मानुष: शुद्धि-
मिच्छतीत्यनेन च प्रकृतावूहायोगात् । अतएव
पत्नीं सन्नह्याज्यं मो धेहीति मन्त्रे दिवक्षुपत्नीक-
यजमानकर्तृकप्रयोगेऽपि न द्विवक्षुवचनोह
इत्युक्तम् ॥ * ॥ पत्रस्यप्रतिज्ञेयार्थस्य शोध्याभ